श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीनरसिंहाचार्यस्वामी विरचिता

# ॥ श्रीतोयाद्रिरङ्गनाथस्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीतोयाद्रिरङ्गनाथस्तुतिः ॥

कमलानयनाञ्चलनीलमहो -
    द्विगुणीकृतचारुशरीररुचे।
परिपालय भक्तजनान् कृपया
    जलपर्वतनायक ! रङ्गपते ॥ 1 ॥

नलिनायतलोचन ! लोकपते !
    भवपाशविमोचनबद्धमते !।
अवधारय संस्तवनं कवनं
    जलपर्वतमौलिमणे ! भगवन् ! ॥ 2 ॥

बहुजन्मसहस्रकृतैः सुकृतैः
    त्वयि भक्तिरुदेत्यमला भगवन्।
इति वेद्मि भवत्पदभक्तिवशात्
    स्तुतिरेवमभूत् जलशैलपते ॥ 3 ॥

तव पादसरोजनिबद्धमतिं
    तव दिव्यकथाश्रवणैकरतिम्।
तव सत्करुणैकनिरूप्यगतिं
    परिपालय मां जलशैलविभो ॥ 4 ॥

अहिराजसुपर्णचमूपतिभिः
    विहिताखिलकिङ्करवृत्तिरभूः।
कथमेवमहं करवाणि विभो !
    तव दास्यमहो ! उदकाद्रिपते ॥ 5 ॥

भृगुनारदमौनिमनःकमले
कमलाहृदये श्रुतिमौलितले।
नगमूर्धनि पन्नगमूर्धनि वा
मम मूर्धनि वा तव वासरुचिः ॥ **6** ॥

स्थितमासितमत्र गतं शयितं
भवतेति जगौ परकालमुनिः।
जलसन्निभशान्तनृसिंहतनु -
त्रिपदक्रमरङ्गपतिप्रथया ॥ **7** ॥

जगतां सृजनं परिपालनम -
प्यथ संहरणं बत लीलतया।
कुरुषे भगवन् ! कृपया परया
न समोऽप्यधिकस्तव रङ्गपते ॥ **8** ॥

जगदेतदुदेति समेति लयं
सकलं च तवेक्षणमात्रवशात्।
तदपि स्वयमेव विधातुमना
अवतारगणान् वहसीह हरे ॥ **9** ॥

झषकूर्मवराहनृसिंहतया
वटुभार्गवरामहलाङ्कतया।
अपि कृष्णतया बहुवेषयुजे
जगदीश ! नमः करुणैकजुषे ॥ **10** ॥

उपधाय च दक्षिणबाहुवरं
प्रविसार्य करं त्वितरं मधुरम्।
शुभलक्षण ! दक्षिणदिग्वदनः
शयितोऽसि चराचरलोकपते ॥ **11** ॥

जलपर्वत एष परत्वगुणं
सुलभत्वमपि प्रतिपादयते।
अधिकं हि विना श्रममत्र जनाः
तव दर्शनभाग्यमुपाददते॥ **12** ॥

स्थितिसंयमसृष्टिविनोदकथां
परिकल्प्य पुराकृतकर्मफलम्।
अनुभावयसि प्रजया कृपया
ह्यपुनर्भवमोक्षविधानधिया॥ **13** ॥

अतिवेलमहाघसमुद्रमिमं
कथमीश ! तरेयममेयभयम्।
करुणोडुपमद्य न यच्छसि चेत्
जलपर्वतशेखर ! रङ्गपते॥ **14** ॥

विमुखीकुरु मां जलशैलपते !
विषयानुभवात् विषतुल्यनयात्।
मम देहि विभो ! ध्रुवसंस्मरणं
सुमुखीभव दैवतमौलिमणे॥ **15** ॥

करणत्रितयेन भवद्भजनं
करवाणि सदा निरुपाधिमुदा।
भुवि वा दिवि वा निरयेऽप्यथ भोः !
इदमेव वृणे ! जलशैलमणे॥ **16** ॥

भवतापदवानलदग्धमिदं जगदद्य सुधामयदृङ्निचयैः।
पुनरेधय साधय लोकहितं जलशैलनिवास ! रमेश ! हरे॥ **17** ॥

॥ इति श्रीतोयाद्रिरङ्गनाथस्तुतिः समाप्ता॥